*Vaibhavaṁ*: An International Peer Reviewed Multilingual Research Book on Indological Study edited by Dr. Dhundi Raj Upadhyaya (Chief Editor), 2019.

**Chief Editor**
Dr. Dhundi Raj Upadhyaya

**Editors**
Narad Nirola
Dr. Sagarika Bhattacharjee
Dr. Chandra Shekhar Upadhyaya
Dr. Anjana Chakraborty

**Edition**
2019 (Vikram Samvat: 2075-76)

© - To the Chief Editor

ISBN - 978-93-88593-35-9

**Publisher**
Vagambhrini-Sanskrit-Sahitya-Samiti
Email- rajjmg@gmail.com,
sagarikabhattacharjee700@gmail.com
☎+91-8638082147, 7086879817 & 9401427221
वागाम्भृणी-संस्कृत-साहित्य-समिति /facebook.com

**Co-Publisher**
Purbayon Publication
Satmile, Near Gauhati University
Guwahati-14, Assam, India
Email-purbayonindia21@gmail.com
www.purbayonpublication.com
☎+91-9864422157

The research papers must be original in nature. The authors of the papers are fully responsible for the facts and opinions expressed in their articles. The Chief Editor, the Editors, the Editorial Advisory Board and the Publisher have no responsibility for that.

PRINCIPAL
Ramkrishna Nagar College
Ramkrishnanagar, Karimganj
Assam

## EDITORIAL ADVISORY BOARD



**Prof. Swapna Devi**
Former Dean, Rabindranath Tagore School of Indian languages & Cultural Studies, Former HOD, Dept. of Sanskrit, Assam University, Silchar (India)



**Dr. Momenur Rasul**
Asstt. Prof., Dept. of Bengali, Dhaka University, Dhaka, (Bangladesh)



**Dr. Jayanta Sharma**
HOD, Department of Sanskrit, Darrang College, Tezpur, Assam (India)



**Chhatrapati Phuyel**
Sanskrit Scholar & Writer/Journalist, Dorokha, Samtse, (Bhutan)

# सूचीपत्रम् (*CONTENTS*)


संस्कृतभाषायाम् (Sanskrit)

डॉ. अञ्जनाचक्रवर्ती ---- संस्कृतं किं, किं वा अस्य पठनेन //7

नयनज्योति शर्मा ---- असमीयालोककथासु डाकवचनम् //11

नेपालीभाषायाम् (Nepali)

नारद निरोला ---- नाट्यकार रेवतीमोहन तिम्सिना र उनको "बोक्सी" नाटक : एक पर्यालोचना //19

सुभाष अधिकारी ---- नेपाली भेष-भुषा: परिचयात्मक अध्ययन //23

हिन्दीभाषायाम् (Hindi)

नीरज कुमारी ---- 'जहाँ बाँस फूलती हैं में चित्रित मिजो समाज एवं उसका मूल्य-बोध //28

डॉ. डॉली जैन ---- कौटिल्य अर्थशास्त्र में वर्णित न्याय व दण्ड व्यवस्था की प्रासंगिकता //33

बङ्गभाषायाम् (Bengali)

ড. সাগরিকা ভট্টাচার্য্য ---- বৈদিক সাহিত্যের প্রেক্ষাপটে সঙ্গীতের শাব্দিক ব্যুৎপত্তি ও উৎপত্তি : এক সমীক্ষা //39

असमीयाभाषायाम् (Assamese)

ড° স্বপ্না বৰা আৰু ড° চুণ্ডিৰাজ উপাধ্যায় ---- প্ৰাচীন ভাৰতীয় উদ্ভিদ বৈজ্ঞানিক আৰু উদ্যান ব্যৱস্থা : বৃক্ষায়ুৰ্বেদাধ্যায় আধাৰিত এক অধ্যয়ন // 45

आङ्गलभाषायाम् (English)

**Nalini Chandrakant Ambekar** ---- 'Dharma' reflected in the Plays of Bhāsa //50

**Abhijit Das** ---- Construction of Theatre House and Stage in Sanskrit Drama: A Sociological Study //55

**Anjali Ganpule** ---- Importance of Apālā in marriage rituals //61

**Sanjoy Das** ---- The History of Assam reflected in the Epic, Purana Inscription and literature //67




## संस्कृतं किं, किं वा अस्य पठनेन


डॉ. अञ्जनाचक्रवर्ती
(Dr. Anjana Chakraborty)
Head of the Department, Sanskrit Deptt.,
Ramkrishna Nagar College, Karimganj, Assam (India)



PRINCIPAL
Ramkrishna Nagar College
Ramkrishnanagar, Karimganj
Assam


संस्कृते उक्ते संस्कृतभाषेऽति बुध्यते। परिमार्जितं सुशृङ्खलितं किञ्चिदेव संस्कृतम्। इयं भाषा संस्कृता। यतो महावैयाकरणपाणिनिविहितैः नियमैः एषा सुशृङ्खलिता अस्ति। अस्माकमयं भारतवर्षः संस्कृतभाषाया उत्पत्तिस्थानं वृद्धिस्थानं चेति। भारतवर्षस्य जीवनमेव संस्कृतभाषायां निहितमित्युक्तिरपि नात्युक्तिदोषदुष्टा। पृथिव्यां प्रचलितभाषासु संस्कृतभाषा प्राचीनतमाभाषा। अस्याः भाषायाः माधुर्यं शब्दसम्भारं च पृथिव्यामन्यान्यप्रचलितभाषायाः केवलं तुल्यं न, अपि च श्रेष्ठम्। अपि च भाषायां निहितानि महत्त्वानि मानवजातेः संस्काराय भवन्ति। भाषा इयं यथा सुमधुरा सुललिता तथैव सारकरी। एतदेव अस्याः वैशिष्ट्यम्। आदिकविना बाल्मीकिना उच्चारितः प्रथमः श्लोकः

"मा निषाद प्रतिष्ठां त्वं गमः शाश्वतीः समाः।
यत् क्रौंचमिथुनादेकमवधीः काममोहितः॥"

- इत्यादि संस्कृतभाषायाम् एव विरचितः।

पूर्वकालेऽत्र संस्कृतभाषयैव सर्वं कार्यं क्रियते स्म, सर्वेऽपि व्यवहाराः संस्कृतभाषयैरेव सम्पाद्यन्ते स्म। सा च भाषा भारतवर्षस्य प्राचीना भाषा यस्यां भाषायां सर्वे साहित्यग्रन्थाः, राजनीतिग्रन्थाः, अर्थनीतिग्रन्थाः, विज्ञानग्रन्थाः, धर्मग्रन्थाः, उपनिषद्ग्रन्थाः, चिकित्साशास्त्राणि, दर्शनशास्त्राणि, महाकाव्यानि, ज्योतिर्विज्ञानानि साहित्यादीनि च सर्वाणि पुस्तकानि संस्कृतभाषया रचितानि आसन्। इत्थं भूताया संस्कृतभाषायाः महत्वं प्रतिपादयन्तः केचनावोचन् -

सर्वाषामपि भाषाणां जनानां जीवनं यतः।
भासते संस्कृतं तेन शरीरस्य यथासवः ॥

भारतवर्षे यद्यापि वहुभाषाभाषिणः जनाः वर्तन्ते तथापि सर्वभाषाणां जननीस्वरूपा इयं भाषा। माता यथा मातृदुग्धेन सन्तानान्पालयति तत्वत् इयं भाषा सर्वभाषानां पुष्टीकरोति। सर्वाः भाषाः संस्कृतात् एव जायन्ते। तस्मात्भारतवर्षस्य संस्कृते ऐक्यता संस्कृतेनैव सिध्यति। वेदशास्त्र - रामायण- महाभारत- पुराणशास्त्राणि सर्वाणि भारतवर्षे संस्कृते ऐक्यम्साधयन्ति। अतः संस्कृतं विना भारतीयता कल्पयितुं न शक्यते। भारतीयभाषाणां समृद्धये संस्कृतभाषाज्ञानस्य प्रयोजनमस्ति। बह्वीनां भारतीयभाषाणां जननी सती इयं संस्कृतभाषा भारतीयजातीयसंहतेरपि कारणं भवति। तेन हि कारणेन संस्कृतभाषा मह्यम् अतीव रोचते।

केचिच्चिन्तयन्ति यद् वर्तमानसमये शिक्षायाः क्षेत्रं शिक्षणीयविषयाणां वाहुल्यादेतादृशं विस्तीर्णं यत्केवलं संस्कृतभाषाज्ञानपूर्वकं संस्कृतभाषया लिखितानि शास्त्राणि पठित्वा वर्तमानयुगस्योपयोगिनीं शिक्षां लब्धुं न शक्यते। तेषां मतेन संस्कृतभाषाया देवभाषेऽति नामत एव ज्ञायते यत्संस्कृतभाषा जनताया भाषा ना। अतएव संस्कृतभाषा जनशिक्षाया माध्यममपि भवितुं नार्हति। संस्कृतभाषया ये ग्रन्था विलिखितास्तेऽतीवप्राचीना। वहुकालं व्याप्य संस्कृतभाषाया कोऽपि मौलिकग्रन्था विरचिताश्च। अतो जनानां वर्तमान-सर्वसाधारणजीवनधारया सह संस्कृतसाहित्यस्य कोऽपि सम्पर्को नास्ति। संस्कृतभाषातीव प्राचीना संस्कृतसाहित्यञ्च सुप्राचीनम् इत्येवं मत्वैव संस्कृतभाषाया संस्कृतसाहित्यस्य च मूल्याङ्कणं कर्तव्यम्। अपिच, अनेन विवेचनेनैव संस्कृतभाषा संस्कृतसाहित्यञ्च वर्तमानशिक्षापरिकल्पनायां स्थानं लब्धुमर्हति इति।

यथार्थं संस्कृत भाषाज्ञानं विना भारतवासिनाम् उन्नति न भवति। कारणं यत् अस्माकं जीवनस्य प्रयोजनीय सर्वाणि विषयवस्तुनि येषु ग्रन्थेषु वर्तन्ते तत्सर्वाणि संस्कृतभाषया रचनं कुर्वन्ति। अस्माकं जीवनस्य उन्नति विधानाय संस्कृताध्ययनस्य भूयशी प्रयोजनमस्ति। यदि संस्कृताध्ययनेन अस्माकं संस्कृतभाषायाः ज्ञानं वर्धितं स्यात्तेन तर्हि अस्माकं मातृभाषा उन्नतात् उन्नततरा भवति। तस्मात्संस्कृतभाषाऽध्ययनस्य अतीव प्रयोजनम्।

संस्कृतगीतायाः मुग्धः इंरेजकविहोरेस्हैम्यान्उइल्सन्संस्कृतप्रशंसायाउद्धृता -

"अमृतं मधुरं सम्यक्संस्कृतं हि ततोऽधिकम्।
देवभोग्यमिदं तस्माद्देवभाषेति कथ्यते॥
न जाने विद्यते किं तन्माधुर्यमत्र संस्कृते।
सर्वदैव समुन्मत्ता येन वैदेशिका वयम्॥"

विश्वकल्याणे संस्कृतभाषाया अवदानम् अतुलनीयम्। संस्कृतभाषायै कदा सुमात्रा, जाभा, वालि, इन्दनेशिया, मालय प्रभृतीनां च देशानां लेख्यभाषारूपेण स्यादिति



शिलालिप्यादिसमीक्षया भाषातत्वविद्भिः स्वीकृता। विश्वहिताय तत्वदर्शिनो ऋषिभि युगे युगे संचिन्तयन्ती तत्तथ्यं यद्विदितन्ते स्तत्सर्वं जगतः कल्याणार्थं वेदादिषु ग्रन्थेषु संस्कृतभाषायामेव सुष्ठु लिखितमास्ते। विश्वकल्याणे एव तेषां ऋषिणां दृष्टिरासीत्। तेषां कल्याणमयी वाणी विश्वमानवान्प्रति न तु कमपि देशविशेषं जातिविशेषं सम्प्रदायविशेषंप्रति वा।

संस्कृतं न केवलम् एका भाषा तत्तु भारतनिवासिनां जीवनमेव। जलं विना जीवनं यथा असम्भवं तथैव संस्कृतं विना भारतीय संस्कृतिरपि। तस्मात्संस्कृतं सर्वैरध्येयम्। भारतसमुभ्दूता सर्वे धर्मग्रन्था संस्कृतभाषया एव लिखिता वर्तन्ते। धर्मीयकार्य्येषु संस्कृतप्रयोगः अपरिहार्यः । एतदर्थमपि संस्कृतज्ञानम् एकान्ततया आवश्यकम्।

संस्कृतं सर्वत्र शिक्षाप्रतिष्ठानेषु प्रचलितं वर्तन्ते। बेतारे दुरदर्शने च संस्कृतवार्ता कथिकानाटकानि च प्रचारितानि भवन्ति। अतः सवैरेव संस्कृतं ज्ञेयम्। प्राचीनकालादेव भारतवर्षे संस्कृतभाषायाः चर्च्चा प्रचलिता। मोगलशसनकालेऽपि भारतवर्षे संस्कृतभाषा चर्च्चा आसीत्। तस्मिन्काले आरबीयभाषायामपि संस्कृतगीतायाः अन्येषां ग्रन्थानामपि अनुवादः क्रियते स्म। अधुनापि संस्कृतभाषा भारतवर्षे स्वमहिम्ना विराजितास्ति। प्रात निद्रात्यागात्पश्चात् 'वन्देमातरम्' इति सङ्गीतं श्रुत्वा अस्माकं प्रात्यहिकदिनस्य शुभारम्भो भवति। पुनश्च भारते प्रचलितेषु रौप्यकेषु भारतसर्वकारस्य लिखितपत्रेषु वा 'अशोकस्तम्भ' इतिचित्रस्य निम्नभागे 'सत्यमेवजयते' इति या वाणी मुद्रिता दृश्यते सा एव हि संस्कृतस्य सम्पत्। संस्कृतभाषा एवं स्वमहिम्ना एव भारते अधिष्ठिता वर्तते।

अतः एतादृशीं संस्कृतभाषां विहाय केवलम् आङ्गलभाषामधिकृत्य अध्ययनेन किम्? इदं च मयि मातरं विहाय मातृस्वसु सेवनमिव प्रतिभाति। संस्कृतं विना भारतीयता कल्पयितुं न शक्यते तेन हि उक्तम् -

"विना वेदं विना गीतां विना च रामायणींकथाम्।
विना कविं कालिदासं कुत्र स्याद्भारतीयता॥"

अतः संस्कृतं विना भारतीयता नास्ति। संस्कृतभाषा मधुरा सर्वजनश्रद्धार्हा। न केवलं भारतवर्षे भारताद्बहिरपि संस्कृतभाषा आलोचिता अस्ति। विदेशे संस्कृतचर्च्चा क्रियते वैदेशिकैः। भिण्टारनित्स-मोक्षमूलार-ग्येटे-कीथादयः पाश्चात्यपण्डितप्रवराः अपि सदैव संस्कृतस्य चर्चां श्रद्धया कुर्वन्ति स्म।

"न जाने विद्यते किं तन्माधुर्यमत्र संस्कृते।
सर्वदैव समुन्मत्ता येन वैदेशिका वयम्॥"

PRINCIPAL
Ramkrishna Nagar College
Ramkrishnanagar, Karimganj
Assam

तथापि केचन अर्वाचीना वदन्ति संस्कृतभाषा मृता भाषा एव अस्ति। एतादृशा जना अज्ञानविवेकरहिताश्च। आत्मन: अज्ञता विवेकहीनता च हि तेषां संस्कृतभाषाविरागस्य संस्कृतभाषामृता इति कथनस्य च कारण्म्। अस्माकं देहस्य रक्तवाहिका शिरा सदृशी एव संस्कृतभाषा भारतीय जातीयदेहे विद्यते। अथ संस्कृतभाषा कदापि न म्रियते।वङ्गभाषायामपि उक्तम् -

"মরে না মরে না কভু, সত্য যাহা -
শতাব্দীর বিস্মৃতির তলে।
নাহি মরে উপেক্ষায়,
আঘাতে না টলে ||'

अथ सत्यस्य कस्यचिदपि नाशो कदापि न भवति। तेन हि कारणेन पाश्चात्य कविना उइलसन् इति महाभागेन उक्तम् -

"यावद्भारतवर्षं स्याद्यावद्विन्ध्यहिमाचलौ।
यावद्गङ्गा च गोदा च तावदेव हि संस्कृतम्।"

अथैकदा भारतवर्षे संस्कृतभाषां राष्ट्रभाषाया: मर्य्यादां प्रदातुं चेष्टा कृता विद्वज्जनै:, येन अस्माभि: सर्वै भारतवासिभि: सर्वथा संस्कृतभाषा पठिता स्यात्। अस्माकं संस्कृतज्ञानं हि अस्माकं भारतीयतां प्रमाणयति। तद् अहमपि नित्यं संस्कृतं पठामि, संस्कृतं वदामि, संस्कृतं ध्यायामि च तत: श्रद्धया इमां भाषां नमस्करोमि -

या भाषा सर्वकालेषु सर्वदेशेषु आद्रिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनम: ॥ इति शम् ।

PRINCIPAL
Ramkrishna Nagar College
Ramkrishnanagar, Karimganj
Assam

**ग्रन्थसूची -**
* असमराज्ये संस्कृत-चर्चा - ड. राजेन्द्रनाथशर्मा
* संस्कृतप्रशंसा – उइलियाम् उइलसन्

❀ ❀ ❀ ❀ ❀ ❀



***Vaibhavam*: (A Research Book on Indological Study)**
An International Peer Reviewed Multilingual Edition (2019).

# असमीयालोककथासु डाकवचनम्

**नयनज्योति शर्मा**
Sanskrit Teacher
Lakhimi Pathar High School, Baksa, Assam (India)

**भूमिका-** वेद नाम श्रुतिः। गुरुशिष्यपरम्परायाः श्रवण-ग्रहणमाध्यमेन अस्य अध्ययनम् अभवत् इति कारणात् अस्य अपरनाम श्रुति इति जायते। परन्तु प्राचीनकाले न केवलं वैदिकसाहित्ये अपितु साधारणजनसमाजे जना अनेन माध्यमेन बहूनां विषयानां चर्चाम् अकुर्वन्। एतेषु विषयेषु नीतिवचनानि स्वास्थ्यवचनानि, सामाजिकाचारा इत्यादय अन्यतमा वर्तन्ते। जनसमाजे प्रचलितानाम् एतानां वचनानां कोऽपि लिखितरूपं नोपलभ्यते। जनाः मौखिकपरम्परायामेव इमां धाराम् अङ्गीकुर्वन्ति स्म। सम्प्रतिजनमुखाश्रितानि एतानि वचनानि पण्डिताः साहित्यरूपेणैव स्वीकुर्वन्ति। अस्य लघुसाह्त्यिस्य अपरनाम लोकसाहित्यरूपेण साम्प्रतिकैः कविभिः आख्यायते। एतत् लोकसाहित्यं प्राचीनकालादेव जनमनसि सुगभीरं प्रभावं विस्तारयति । डाकवचनानि अस्यैव लोकसाहित्यस्य उत्कृष्टोदाहरणं वर्तते।

प्राचीननीरक्षर-असमीयाजनसमाजे डाकवचनानि तु वेदवाणीरूपेण स्थानमलभन् । डाकवचनानुसारं जनाः खादन्ति, चलन्ति, जीवनयापनं कुर्वन्ति स्म। तस्मिन् काले प्रायशो नवतिप्रतिशतं यावद् जनाः कृषिकर्मणा स्वकीय जीविकानिर्वहनमकुर्वन्। अतः डाकवचनानुसारं ते कृषिरोपनादिकमपि कुर्वन्ति स्म, यतोहि डाकवचने कृषिविषयकविधयः प्रचलितासन्। एवं प्राचीन-असमीयासमाजस्य जीवनदर्पणस्वरूपं एतेषु डाकवचनेषु विभिन्नानां विषयानां चर्चाअभवत् | तद् यथा- धर्मप्रकरणं, नीतिप्रकरणं, पाचनप्रकरणं, गृहिणीलक्षणं, पुरुषलक्षणं, स्वास्थ्यविषयकप्रकरणं, ज्योतिषप्रकरणं चेत्यादीनि।
**डाकपुरुषस्य संक्षिप्तः परिचयः-** समयः परिवर्तनशीलोऽस्ति। परिवर्तनस्य अस्यां धारायां कदाचित् बहूनां विषयानां मूलतन्दुमेव लुप्तोभवति। अतो डाकवचनमपि इतो न अभेदः। यदि वयं डाकवचनस्य उत्पत्तिं प्रति पर्यवेक्षयामः तर्हि, अत्र एकः सर्वसन्मतः सर्वग्राह्यः च युक्तिः न अवलोकनं कुर्मः। यद्यपि डाकवचने डाकपरिचयं मिलति तथापि केचन् पण्डिताः अस्य सत्यताविषये सन्देहाङ्गुलीं दर्शयन्ति। तेषां मतानुसारं डाकः नाम उक्तिः विशेषः। असमीयाभाषायां डाक इति शब्दस्य प्रतिशब्दम् आह्वानम्, सम्बोधनम्, उच्चारणं वा भवति।